दिनाङ्क :-07.12.2024

प्रात: - 06:55

अथ वार्ता:

प्रधानमन्त्री-अष्टलक्ष्मी महोत्सव

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् पूर्वोत्तरीयं भारतं समग्रस्य राष्ट्रस्य विकासाय पर्याप्तशक्तिं गतिञ्च आधत्ते। प्रधानमन्त्रिणा ह्यः नवदिल्ल्याम् भारतमण्डपम् इत्यत्र अष्टलक्ष्मीमहोत्सवस्य उद्घाटनम् कृतम्। त्रिदिवसीयः उत्सवः पूर्वोत्तरभारतस्य विशालसांस्कृतिकचित्रं प्रकाशयति, पारम्परिककलाः, शिल्पकलाः, सांस्कृतिकप्रथाः च संयोजयति। महोत्सवः एतेषां प्रदेशानां जीवन्त-वस्त्र-उद्यमस्य, शिल्पकलायाः, पर्यटन-अवसराणां, पूर्वोत्तरस्य अष्टसु राज्यानां अद्वितीय-उत्पादानां च प्रकाशनार्थं असाधारण-मञ्चरूपेण कार्यं करिष्यति। अस्य प्रदेशस्य विंशत्यधिक-त्रिशतं कृषकाणां शिल्पिनां च उत्पादानां कलानां च प्रदर्शनं कुर्वद् ग्रामीण-आपणम् एव बृहत्तमम् आकर्षणम् भविष्यति। अस्मिन् कार्यक्रमे पूर्वोत्तरभारतस्य प्रसिद्धानां मुगा अथ एरी नामाख्ययौः सिल्क् इत्येतयोः कृते समर्पितानि मण्डपानि, शिल्पकलानां प्रत्यक्षप्रदर्शनानि, क्षेत्रस्य भौगोलिक-सूचक-उत्पादानाम् विषये च विशेषम् अवधानं भविष्यति। महोत्सवः अस्य जीवन्त-प्रगतिं प्रदर्शयितुं महत्त्वपूर्ण-क्षणरूपेण कार्यं करिष्यति, पूर्वोत्तरभारतस्य सांस्कृतिकसमृद्धेः उत्सवम् आचरति तथा च तस्य निरन्तरवृद्धेः विकासस्य च समर्थनाय नूतनान् निवेशान् आमन्त्रयिष्यति।

स्वास्थमन्त्रालयः

स्वास्थ्यपरिवारल्याणञ्चेति मन्त्रालयेन समग्रे राष्ट्रे क्षयरोगं विरुध्य शतदिवसीयम् अभियानम् प्रचाल्यते। स्वास्थयमन्त्रिणा जगतप्रकाश-नड्डा इत्यनेन हरियाणायाः पंचकुलानगरात् प्रदेशस्य मुख्यमन्त्रिणः नायबसिंहस्य उपस्थितौ अभियानस्यास्य शुभारम्भः ह्यः विहितः। अवसरेऽस्मिन् प्रदेशस्वास्थ्यमन्त्री आरतीसिंहराव इत्येषाऽपि समुपस्थिताऽऽसीत्।

विदेशमन्त्रालयः

विदेश-मन्त्रालयेन भारतीयनागरिकेभ्यः सीरियादेशस्य संकटापन्नां स्थितिमालक्ष्य तत्रत्या यात्रा मा कुर्यरिति सञ्चेतना प्रसारिताऽस्ति। एकास्मिन् परामर्शे विदेशमन्त्रालयेन उक्तं यत् सीरियादेशे सम्प्रति भारतीयाः कथं सन्तिति ज्ञानाय दमिश्क इत्यत्र भारतीयदूतावासेन सह सम्पर्को विहितव्यः इति। ये तत्रस्थिताः जनाः सन्ति ते निर्दिष्टाः सन्ति यत् शीघ्रातिशीघ्रतया निर्गच्छन्त्विति।

-

संयुक्तराष्ट्र/भारतम्

भारतदेशः संयुक्तराष्ट्रसंघस्य अष्टषष्टितमस्य मादक-पदार्थ-आयोग इत्यस्य आध्यक्षं करोति। वियनादेशे संयुक्तराष्ट्रसंघस्य भारतपक्षीयः स्थायिसदस्यः शम्भुकुमारन् इत्ययनेन ह्यः आधिकारिकरूपेण सी.एन.□ी. इत्यस्य अध्यक्षता कृता।

हॉकी

हॉकी-क्री□ायां कनिष्ठ-महिला-एशिया-चषकस्पर्धा आद्यारभ्य ओमानदेशस्य मस्कटेतिनगरे समारभते। अस्यां स्पर्धायां दशदलानि प्रातिभाग्यं कुर्वन्ति। स्पर्धेयम् अग्रिमवर्षे चिलीदेशे सम्भावितस्य एफ आई एच

कनिष्ठ -विश्व-चषक-स्पर्धायै पात्रता विधायिकेति अस्ति। प्रथम-ए वर्गे भारतीयदलस्य साम्मुख्यं कोरिया, जापान, चीन-ताइपे, हांगकांग, श्रीलंकेति देशैः सह भविष्यति।

## क्रिकेट-नवदशवयोवर्गीयस्पर्धा

पुरुषक्रिकेट-नवदशवयोवर्गीय-एशियाचषक-स्पर्धायां ह्यः भारतेन उपान्त्यचक्रे श्रीलंकादलं सप्तस्तोभैः पराजितम्। भारतेन चतुः सप्तति-अधिकैक-शतं धावनांकानां लक्ष्यं एकविंशतिः-दशमलव चत्वारि क्षेपणचक्रेषु एव स्वायत्तीकृतम्। वैभव-सूर्यवंशी इत्यमुना षट्त्रिंशत् कन्दुकेषु सप्तषष्टिः धावनांकाः संप्राप्य सर्वाधिक-धावनांकाः निर्मिताः। अपरत्र उपान्त्यचक्रे बांग्लादेशदलेन दुबई-अन्ताराष्ट्रिय-क्री□ाङ्गणे पाकिस्तानदलं सप्तस्तोभैः पराजितम्। अनेनप्रकारेण आन्तिमस्पर्धायं भारतबांग्लादेशयोः साम्मुख्यं भविष्यति। ध्यातव्यमस्ति यत् बांग्लादेशः गतस्पर्धायाः विजेतादेशो वर्तते। संघर्षोऽयं अद्य दुबईनगरे समारप्स्यते।

इति वार्ताः